## अध्याय :- ४४ chapter-44

अर्जुन उवाच ।।[१]
दिव्यप्राकारमिच्छामि श्रोतुं चाहं मुनीश्वर ।।
कथं कार्याणि कानीह स्फुटं यैः[२] पुण्यपापकम् ।। १

नारद उवाच ।।[३]
शपथाः कोशघटकौ विषाग्नी तप्तमाषकौ ।।
फलं च तंदुलं चैव दिव्यान्यष्टौ विदुर्बुधाः ।। २

आज्ञाक्षिकेषु चार्थेषु मिथो विवदमानयोः ।।
राजद्रोहाभिशापेषु साहसेषु तथैव च ।। ३

अविदस्तत्त्ववतः सत्यं शपथेनाभिलंघयेत् ।।
महर्षिभिश्च देवैश्च सत्यार्थाः शपथाः कृताः ।। ४

जवनो नृपतिः क्षीणो मिथ्या शपथमाचरेत् ।।
वसिष्ठाग्रे वर्षमध्ये ज्ञान्वयः किल भारत ।। ५

अंधः शत्रुगृहं गच्छेद्यो मिथ्याशपथांश्चरेत् ।।
रौरवस्य स्वयं द्वारमुद्धाप्यति दुर्मतिः ।। ६

मन्यंते[४] वै पापकृतो न कश्चित्पश्यतीति नः ।।
तांश्च देवाः प्रपश्यंति स्वस्यैवांतर पौरुषाः[५] ।। ७

---

१ अ. श्री अर्जुन ।। ब. अर्जुनोवाच ।।
२ ब. हि पाठः ।
३ अ. श्रीनारद ।। ब. श्रीरिनोद उ० ।।
४ ब. अन्यंते
५ अ. पौरुषः

आदित्य चंद्रावनिलो/नलश्च द्यौभूमिरापो त्ददयं यमश्च ।।
अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जानापि नरस्य वृत्तम् ।। ८

एवं तस्माद भिज्ञाय सत्यार्थशपथांश्चरेत् ।।
वृथा हि शपथान्कुर्वन्प्रेत्य चेह विनश्यति ।। ९

~~वृथा हि- शपथान्कुर्वन्प्रेत्य चेह~~
इदं सत्यं वदामीति ब्रुवन्साक्षी भवान्यतः ।।
शुभाशुभफलं देहि शुचिः पादौ रवेः[१] स्पृशेत् ।। १०

अथ शास्त्रस्य विप्रो/पि शस्त्रस्यापि च क्षत्रियः[२] ।।
मां संस्मृशंस्तथा वैश्यः शूद्रः स्वगुरुमेव च ।। ११

मातरं पितरं पूज्यं स्पृशेत्साधारणं त्विदम् ।।
कोशस्य रूपं पूर्वं ते व्याख्यातं पांडुनंदन ।। १२

विप्रवर्ज्यं तथा कोशं वर्णिनां दापयेन्नृपः ।।
यो यो यदेवताभक्तः पाययेत्तस्य तं नरम् ।। १३

सम भक्तं च देवानामादित्यस्यैव पाययेत् ।।
सर्वेषां चोग्र देवानां स्नापयेदायुधास्त्र कम् ।। १४

---

१ ब. रवे
२ अ. क्षत्रिया ब. क्षत्रयः

स्नोनोदकं[1] वा संकल्पं गृहीत्वा पाययेन्नवम् ।।
त्रिसप्तरात्र मध्ये च फलं कोशस्य निर्दिशेत् ।। १५

अतः परं महादिव्य विधानं श्रृणु यद्भवेत्[2] ।।
संशयच्छेदि सर्वेषां धाष्टर्यात्ति दिव्यमेव च ।। १६

सशरस्कं प्रदातव्यमिति ब्रह्मा पुराब्रवीत् ।।
महोग्राणां च दातव्यम शिरस्कमपि स्फुटम् ।। १७

साधूनां वर्णिनां राजा न[3] शिरस्कं प्रदापयेत् ।।
न प्रवाते ~~प्र~~ घटं देयं नीष्णकाले हुताशनम् ।। १८

वर्णिनां च तथा कालं तंदुलं मुखरोगिणाम् ।। १९

कुष्ठपित्तार्दितानां च ब्राह्मणानां[4] च नो विषम् ।।
तप्तमाषकमर्हति सर्वे धर्म्यं निरत्ययम् ।। २०

न व्याधिमरके देशे शपथान्कोशमेव च ।।
दिव्यान्यासुरकै मंत्रैः स्तंभयंतीहकेचन ।। २१

---

१ अ. ब. 'स्नानोदकं' इति स्यात् ।
२ ब. यद् भारत्
३ अ. ना
४ अ. नां

प्रतिघातविदस्तेषां योजयेद्धर्म वत्सलान् ।।
दिव्यानां स्तंभकान्ज्ञात्वा पापान्नित्यं महीपतिः[1] ।। २२

विवासयेत्स्वकाद्राष्ट्रात्ते हि लोकस्य कंटकाः ।।
तेषामन्वेषणे यत्नं राजा नित्यं समाचरेत् ।। २३

ते हि पापसमाचारास्तस्करेभ्योऽपि तस्कराः ।।
प्रागुद्दृष्ट दोषान्स्वल्पेषु दिव्येषु विनियोजयेत् ।। २४.

महत्स्वपि न चार्थेषु धर्मज्ञान्धर्म वत्सलान् ।।
न मिथ्यावचनं येषां जन्मप्रभृति ~~श्रे~~व विद्यते ।। २५

श्रद्दध्यात्पार्थिवस्तेषां वचनां देव भारत ।।
ज्ञात्वा धर्मिष्ठतां राजा पुरुषस्य विचक्षणः ।। २६

क्रोधाल्लोभात्कारयं ~~ऋ~~व स्वयमेव प्रदुष्यति[2] ।।
तस्मात्पापिषु दिव्यं स्यात्तत्रादौ प्रोच्यते घटे ।। २७

सुसमायां पृथिव्यां च दिग्भागे पूर्वदक्षिणे ।।
यज्ञियस्य[3] तु वृक्षस्य स्थाप्यं स्यान्मुंडकद्वयम् ।। २८

---

१ ब. महीपति
२ ब. विदुष्यति
३ अ. ब. यज्ञी

स्तंभकस्य प्रमाणं च सप्तहस्तं प्रकीर्तितम् ।।
द्वौ हस्तौ निखनेत्काष्ठं दृश्यं स्याद्धस्तपंचकम् ।। २९

~~अंतरं तु तयोः कार्यं दृढं कुर्याद्विचक्षणः~~ ++
अंतरं तु तयोः कार्यं तथा हस्तचतुष्टयम् ।।
मुंडकोपरि काष्ठं च दृढं कुर्याद्विचक्षणः ।। ३०

चतुर्हस्तं तुलाकाष्ठमव्रणं कारयेत्स्थिरम् ।।
खदिरार्जुनवृक्षाणां [1]शिंशपाशालजं त्वथ ।। ३१

तुलाकाष्ठे तु कर्तव्यं तथा वै शिक्यकद्वयम् ।।
प्राङ्मुखो निश्चलः कार्यः शुचौ देशे घटस्तथा[2] ।। ३२

पाषाणस्यापि जायेत स्तंभेषु च घटस्तथा[3] ।।
वणिक्सुवर्णकारो वा कुशलः कांस्यकारकः ।। ३३

तुलाधारधरः कार्यो रिपौ मित्रे च यः समः ।।
श्रावयेत्प्राड्विवाकोऽपि तुलाधारं विचक्षणः ।। ३४

ब्रह्मघ्ने ये स्मृता लोका ये च स्त्रीबालघातके ।।
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा ।। ३५

---

१ अ. शंशपालजं
२ ब. घटः सदा
३ ब. घटः सदा

एकस्मिंस्तोलयेच्छिक्ये ज्ञातं सूपोषितं नरम् ।।
द्वितीये मृत्तिकां शुक्षां ~~शुक्ष~~ गौरां तु तुलयेद्बुधः ।। ३६

इष्टिकाभस्मपाषाण कपालास्थीनि वर्जयेत् ।।
तोलयित्वा[1] ततः पूर्वं तस्मात्तमवतारयेत् ।। ३७

मूर्घ्नि पत्रं ततो न्यस्यन्यस्तपत्रं निवेशयेत् ।।
पत्रे मंत्ररस्तवयं लेख्यो यः पुरोक्तः स्वयंभुवा ।। ३८

ब्रह्मणस्त्वं सुता देवि तुलानाम्नेति कथ्यते ।।
तुकारो गौरवे नित्यं लकारो लघुनिस्मृतः ।। ३९

गुरुलाघवसंयोगात्तुला तेन निगद्यसे[2] ।।
संशयान्मोचयस्वैनमभिशस्तं नरं शुभे ।। ४०

भूय आरोपयेत्तं तु नरं तस्मिन्सपत्रकम् ।।
तुलितो यदि वर्धेत शुद्धो भवति धर्मतः ।। ४१

हीयमानो न शुद्धः स्यादिति धर्मविदो विदुः ।।
शिक्यच्छेदे तुलाभंगे पुनरारोपयेन्नरम् ।। ४२

---

१ 'तुलयित्वा' अ. ब. पाठः ।
२ अ. निगद्येते । ब. निगम्यते ।

एवं निःसंशयं ज्ञानं यच्चान्यायं न लोपयेत् ।।
एतत्सर्वं खौ वारे कार्यं संपूज्य भास्करम् ।। ५३

अथातः संप्रवक्ष्यामि विषदिव्यं शृणुष्व मे ।। ५४

द्विप्रकारं च तत्प्रोक्तं घटसर्पविषं तथा ।।
शृंगिणो[१] वत्सनाभस्य हिमशैलभवस्य वा ।। ५५

यवाः सप्त प्रदातव्या अथवा षड्घृतप्लुता ।।
मूर्ध्नि विन्यस्तपत्रस्य पत्रे चैवं निवेशयेत् ।। ५६

[२]त्वं विष ब्रह्मणाः पुत्र सत्यधर्मे व्यवस्थितः ।।
त्रायस्वैनं नरः पापात्सत्येनास्य भवामृतम् ।। ५७

येन वेगैर्विना जीर्णं छर्दिमूर्च्छा विवर्जितम् ।।
तं तु शुद्धं विजानीयादिति धर्मविदो विदुः ।। ५८

क्षुधितं क्षुधितैः सर्प[३] घटस्थं प्रोच्य पूर्ववत् ।।
संस्पृशेत्तालिकाः सप्त न दशेच्छुध्यतीति सः ।। ५९

---

१ अ. ब. 'शृंगिनो' इति पाठः ।
२ ब. 'त त्वं' अत आरंभ्येते ।
३ अ. सर्व

अग्निदिव्यं यथा प्राह विरंचिस्तच्छृणुष्व मे ।।
सप्तमंडलकान्कुर्यादिवस्याग्रे खेरस्तथा ।। ५०

मंडलान्मंडलं कार्यं पूर्वेणैवेति विनिश्चयः ।।
षोडशांगुलकं कार्यं मंडलात्तावदं तरम् ।। ५१

आर्द्रवाससमाहूय तथा चैवाप्युपोषितम् ।।
कारयेत्सर्वदिव्यानि देव ब्राह्मणा संनिधौ ।। ५२

प्रत्यक्षं कारये दिव्यं राज्ञो वाधिकृतस्य वा ।।
ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव च ।। ५३

पश्चिमे दिनकाले हि प्राङ्मुखः प्रांजलिः शुचिः[1] ।।
चतुरस्त्रे मंडले/न्ये कृत्वा चैव समौ करौ ।। ५४

लक्षयेयुः कृतादीनि हस्तयोस्तस्य हारिणः[2] ।।
सप्ताश्वत्थस्य पत्राणि बन्धीयुः करयोस्ततः ।। ५५

नवेन कृत सूत्रेण[3] कार्पासेन द्रढं यथा ।।
ततस्तु सुसमं कृत्वा अष्टांगुलमथायसम् ।। ५६

---

१ अ. शुचिः
२ अ. ब. कारिणः इति स्यात् ।।
३ ब. सितसू

पिंडं हुताग्नि संतप्तं प्रचारात्पलिकं द्रढम् ।।
आदौ पूजां खेः कृत्वा हुताशस्याथ कारयेत् ।। ५७

रक्त चंदन धूपाभ्यां रक्तपुष्पैस्तथैव च ।।
अभिशस्तस्य पत्रं च बन्धीयाच्चैव मुर्धनि ।। ५८

मंत्रेणानेन संयुक्तं ब्राह्मणाभिहि तेन च ।।
त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे ।। ५९

पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे ।।
त्वं मुखं सर्व देवानां त्वं मुखं ब्रह्मवादिनाम् ।। ६०

जठरस्थो/सि भूतानां ततो वेत्सि शुभाशुभम् ।।
पापेषु दर्शयात्मानमर्चिष्मान्भव पावक[१] ।। ६१

अथवा शुद्धभावेषु शीतो भव महाबल[२] ।।
ततो/भिशस्तः शनकैर्मंडलानि परिक्रमेत् ।। ६२

परिक्रम्य शनैर्जह्यात्लोहपिंडं ततः क्षितौ ।।
विपत्रहस्तं तं पश्चात्कारयेद्व्रीहिमर्दनम् ।। ६३

---

१ ब. पावकः ।
२ ब. महाबलः ।।

निर्विकारो करौ दृष्ट्वा शुद्धो भवति धर्मतः ।।
भयाद्वा पातयेद्यस्तु तदद्यौ वा विभाव्यते ।। ६४

पुनस्ताहारयेल्लौहं विधिरेष प्रकीर्तितः ।।
अथातः संप्रवक्ष्यामि तप्तमाषविधिं शृणु ।। ६५

कारयेदायसं पात्रं ताम्रं वा षोडशांगुलम्[1] ।।
चतुरंगलखातं तु मृन्मयं वापि कारयेत् ।। ६६

पूरयेद्धृततैलाभ्यां पलैर्विंशतिभिस्ततः ।।
सतप्ते[2] निक्षिपेत्तत्र सुवर्णस्य तु माषकम् ।। ६७

वह्नयुक्तं विन्यसेन्मंत्रम भिशस्तस्य मुर्धनि ।।
अगुंष्ठां[3] गुलि योगेन तप्तमाषं समुद्धरेत् ।। ६८

शुद्धं[4] ज्ञेयम संदिग्धं विस्फोटादि विवर्जितम् ।।
फालशुद्धिं प्रवक्ष्यामि तां शृणु त्वं धनंजय ।। ६९

आयसं द्वादशपलं घटितं फालमुच्यते ।।
अष्टांगुलदीर्घं च चतुरंगुलविस्तृतम् ।। ७०

---

१ 'षोडसांगुलम्' अ. पाठः ।
२ अ. ब. 'सुतप्ते'
३ अ. अंगुष्टां
४ अ. श्रुद्धं

वह्नयुक्तं विन्यसेन्मंत्रमभिशस्तस्य मूर्ध्नि मूर्धनि ।।
त्रिः परावर्तयेज्जिह्वां लिह्न्नस्मात्षडंगुलम् ।। ७१

गवां क्षीरं प्रदातव्यं जिह्वाशोधन मुत्तमम् ।।
जिह्वा [१]परीक्षणं कुर्याद्गुधा चेन्न विमोच्यते ।। ७२

तं विशुद्धं विजानीयाद्विशुद्धा चेतु जायते ।।
तंदुलस्याथ वक्ष्यामि विधि धर्मं सनातनम् ।। ७३

चौर्ये तु तंदुला देया न चान्यत्र कथंचन् ।।
तंदुलानुदके सिक्त्वा रात्रौ तत्रैव स्थापयेत् ।। ७४

प्रभाते कारिणे देया भक्षणाय न संशयः ।।
त्रिः कृत्वः प्राङ्मुखश्चैव पत्रे निष्ठीवयेत्ततः ।। ७५

पिप्लस्याथ भूर्जस्य न त्वन्यस्य कथंचन् ।।
तांस्तु वै कारयेच्छुद्धांस्तंदुलान्छालि संभवान् ।। ७६

मृन्मये भाजने कृत्वा सवितुः पुरतः स्थितः ।।
तन्दुलान्मंत्रयेच्छुद्धान्मन्त्रेणानेन धर्मतः ।। ७७

---

१ परीषणं अ. ब. पाठः ।

दी
ययिसे, धर्मतत्त्वज्ञैर्मनुष्याणां विशोधनम् ।।
स्तुतस्तन्दुल सत्येन धर्मतस्त्रातुमर्हसि ।। ७८

निष्ठीवने[1] कृते तेषां सवितुः पुरतः स्थिते[2] ।।
शोणितं दृश्यते यस्य तमशुद्धं विनिर्दिशेत् ।। ७९

एवमष्टविधं दिव्यं पापसंशयच्छेदनम् ।।
भद्रादित्यस्य पुरतो जायते कुरुनंदन ।। ८०

जलदित्यं तथा प्राहुर्द्विप्रकारं पुराविदः ।।
जलहस्तं स्मृतं चैकं मज्जनं चापरं विदुः ।। ८१

बाणक्षेपस्तथादानं यावद्वीर्यवताः कृतम् ।।
तावत्तं मज्जयेज्जीवेत्तथा तच्छुद्धिमादिशेत् ।। ८२

एवं विधमिदं स्थानं भद्रादित्यस्य भारत ।।
ममैव कृपया भानोर्जातमेतन्महीतले ।। ८३

* इति श्री स्कांदे...... भद्रादित्य माहात्म्ये दिव्य वर्णनं नाम चतुश्चत्वारिंशो-
- शोऽध्यायः ।।

---

१ अ. ब. 'निष्टिवने' इति स्यात्

२ अ. 'स्थितः । ब स्थितम्

*३ अ. इति श्री स्कंदपुराणे कुमारिकाखंडे दिव्य वर्णनं ।।

ब. इति श्री स्कंदपुराणे कुमारिकाखंडे दिव्य वर्णनं चतुर्थचत्वारिंशोऽध्यायः ।।